# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
# सत्रान्तपरीक्षा, नवम्बर्-दिसम्बर्-२०१६

| | | |
|---|---|---|
| **कक्षा- आचार्य-१ (SEM-1)** | **प्रश्नपत्र-३** | **गुणाः - ७०** |
| **विषयः- स्वामिनारायणवेदान्तः (J)** | **CC-4.1.2** | **समयः - ०३ तः ०६** |
| **दिनाङ्कः - ०७/१२/२०१६** | **सन्दर्भग्रन्थः - ( ऐतरेयतैत्तिरीयोपनिषदौ )** | |

**प्रथमान्वितिः**

**प्र. १ कस्याप्येकस्योत्तरं लिखत ।** **०४**

(१) परमपुरुषः परमात्मा कान् कान् लोकान् असृजत ? समन्त्रं लिखत ।

(२) परमपुरुषः परमात्मा देवेभ्यः भोगाश्रयार्थं किं किं दत्तवान् ? यथग्रन्थं लिखत ।

**प्र. २ कस्याऽपि एकस्य प्रश्नस्य समाधानं कुरुत ।** **१२**

(१) ऐतरेयोपनिषदः सारं लिखत ।

(२) संसारिणः जीवस्य जन्मत्रैविध्यमुपपादयत ।

**प्र. ३ अधोनिर्दिष्टेषु प्रश्नेषु द्वावेव प्रश्नौ समाधेयौ ।** **०४**

(१) देवाः परोक्षप्रियाः कथम् ?

(२) सः परमात्मा अशनायापिपासाभ्यां किं प्रजानीहि ?

(३) ऐतरेयोपनिषदम् आत्मषट्कमिति किमर्थम् उच्यते ?

**द्वितीयान्वितिः**

**प्र. ४ कस्याप्येकस्योत्तरं सविस्तृतं लिखत ।** **०४**

(१) का नाम शिक्षा ? समन्त्रं स्पष्टयत ।

(२) पञ्चाधिकरणकसंहितोपासनस्य किं फलम् ? अथवा महासंहितोपासनायाः फलं स्पष्टयत ।

**प्र. ५ कस्याऽपि एकस्य प्रश्नस्य समाधानं कुरुत ।** **०८**

(१) स य एषोऽन्तर्हदयः आकाशः - इति शिष्यं प्रति उपासनोपदेशमुपवर्णयत ।

(२) ओमिति ब्रह्म - इत्यादिना कृता प्रणवप्रशंसामुपवर्णयत ।

**प्र. ६ निम्नलिखितेषु प्रश्नेषु त्रय एव समाधेयाः ।** **०३**

(१) तैत्तिरीयोपनिषदि कति वल्ल्यः ?

(२) महासंहितोपासने कति अधिकरणानि ?

(३) परविद्योपासनाङ्गभूताः चतस्त्रः व्याहृतयः काः ?

(४) किं नाम अधिज्यौतिषम् ?

(५) किं नाम अधिप्रजम् ?

## तृतीयान्विति:

**प्र. ७ कस्याप्येकस्योत्तरं सविस्तृतं लिखत ।** **०४**

(१) आनन्दवल्ल्यनुसारं अन्नमयकोशं स्पष्टयत ।

(२) ब्रह्मवल्ल्यनुसारं प्राणमयकोशं स्पष्टयत ।

**प्र. ८ अधोनिर्दिष्टेषु प्रश्नेषु द्वावेव समाधेया: ।** **०८**

(१) विज्ञानमयकोशं प्रतिपादयत ।

(२) सोऽकामयत..........सच्च त्यच्चाभवदिति मन्त्रं व्याख्यात ।

(३) यथाग्रन्थमानन्दमयकोशं स्पष्टयत ।

(४) मनोमयकोशं वर्णयत ।

**प्र. ९ निम्नलिखितेषु प्रश्नेषु त्रय एव समाधेया: ।** **०३**

(१) ब्रह्मवल्या: अपरं नाम किम् ?

(२) रसो वै स: । इति कस्यां वल्ल्यां समन्वितं वाक्यम् ?

(३) कस्मात् वाच: निवर्तन्ते ?

(४) ब्रह्म किम् ?

(५) एकोऽहं बहुस्यामित्यत्र एकपदविधायक: क: ?

## चतुर्थान्विति:

**प्र.१० कस्याप्येकस्योत्तरं लिखत ।** **०४**

(१) यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्तीति मन्त्रं व्याख्यात ।

(२) अन्नं ब्रह्मेति यथाग्रन्थं स्पष्टयत ।

**प्र. ११ अधोनिर्दिष्टेषु त्रयाणां भाष्यानुसारं व्याख्यानं कुरुत ।** **१२**

(१) प्राणे ब्रह्मत्वपरिज्ञानं कथम् ? स्पष्टयत ।

(२) मनसि ब्रह्मत्वपरिज्ञानं कथम् ? स्पष्टयत ।

(३) विज्ञानं ब्रह्मेति भृगुवल्ल्यनुसारमुपपादयत ।

(४) ब्रह्मविद्याया: फलं किम् ?

(५) आनन्दो ब्रह्मेति स्पष्टयत ।

(६) ब्रह्मविद्याङ्गतया अनुष्ठेयानि व्रतानि भृगुवल्ल्यनुसारं लिखत ।

**प्र. १२ अधोनिर्दिष्टेषु प्रश्नेषु द्वावेव प्रश्नौ समाधेयौ ।** **०४**

(१) अन्नाद: क: ?

(२) परिमर: - इति पदं व्यख्यात ।

(३) इमानि भूतानि केन जीवन्ति ?